The Brāhmī, International Multidisciplinary Research Journal

(Peer Reviewed, Referred & Open Access Journal)

Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

# श्रीमद्भगवद्गीतायां त्यागवैभवम्

डॉं.पद्मा देवी

अध्यक्षा, सरकारी डिग्री संस्कृतमहाविद्यालयः, वारिपदा, मयूरभञ्जम्

**शोधसारः**

कृष्णद्वैपायनमहर्षिव्यासरचितं श्रीमद्भगवद्गीतायां श्रुति-न्याय स्मृतिप्रस्थानत्रयेषु स्मृतिप्रस्थानत्वेन उपनिषत्सारनिर्यासरूपेण भगवन्मुखनिःश्रुतदिव्यवाणीरूपेण प्रकामं प्रशस्ति काले काले विभर्ति। अस्माकं जीवनचर्यायाः धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयस्य प्रर्तिमूर्त्तिरूपेण श्रीमद्भगव-द्गीता कर्म-ज्ञान-योग-रूपाम् अध्यात्मतत्त्वस्य तथ्यत्रयी निखिलजनकल्याणाय भक्तिज्ञान वैशद्याय स्वस्य स्वारस्यं प्रतनोति। सच्चिदानन्दघनविग्रहनित्यनिरञ्जनश्रीकृष्णस्य गरीयसीं द्रढीयसीं वाणीमुपजीव्य सत्सु बहुषु तत्त्वकदम्बेषु मया सारसंक्षिप्ततया त्यागविभूतिवैभवं स्वमनीषया निष्कर्षरूपेण कानिचित् तथ्यानि निबन्धेऽस्मिन् समुपन्यस्तानि विद्यन्ते । निबन्धेऽस्मिन् मया विषयस्य प्रारम्भ उपक्रमेण समारभ्य त्यागस्वरूपमभिधाय कर्मफलत्यागप्रभृतिविन्दवः समभ्यस्ताः सन्ति । परिशेषे विषयस्य सामग्रिक तथ्यम् उपसंहारद्वारा परिवेषितं विद्यते।

**कूटशब्दाः- गीता, मोक्षः,भक्तिः, त्यागः ।**

## उपक्रमः-

श्रीकृष्णेन एतदपि समाख्यायते स्म।

**यज्ञदानतपकर्म न त्याज्यं कार्यमेव तत्**

**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।**[1]

तत्र यज्ञदान तपरूपकर्माणि न त्याज्यमिति। एतानि सर्वाणि कर्त्तव्यान्येव यतः एतत्सर्वं चित्तशुद्धिकारकत्त्वात् पावनानि भवन्ति । तत्र भगवन्मते सात्त्विकानि यज्ञ-दान-तपांसि फलकांक्षारहितैः कर्त्तव्यानीति निष्कर्षः।

परमात्मनः भगवतः श्रीकृष्णस्य वासुदेवस्य मुखनिःसृता वाणीयं गीता। त्यज् धातोः घञ् प्रत्यये त्यागशब्दः निष्पद्यते । **त्यागाय संम्भृतार्थानां सत्याय मितभाषिणां वर्जनमिति** [2]।

न माता न पिता न स्त्रि न पुत्रस्त्यागमर्हति विवेकपुरुषः (इति शब्दरत्नावली) सर्वकर्मफलविसर्जन यथा-

**त्याज्यं दोषवदित्येके कर्म प्राहुर्मनिषीणः**

**यज्ञदानतपःकर्म न त्याज्यमिति चापरे**[3] **।।**

निश्चयं श्रुणु मे तत्र त्यागो भरतसत्तम । भगवद्गीतायां समासेन उपर्युक्तश्लोकैः त्यागपूतचिन्तने त्यागविषयः जेगीयते । मया निवन्धेस्मिन् प्रस्तावना सहितं कूटशब्दाः, उपक्रमः, आत्मा अविनश्वरः, त्यागस्वरूपं, कर्मफलत्यागः, त्यागमहिमा तथा उपसंहारः प्रभृति सन्दर्भाः सन्निवेशिताः सन्ति । तथा हि भगवद्गीतायां त्यागसम्बन्धे सार्थक श्लोकः नीचैरुटङ्कितः-

**त्यागो हि पुरुषव्याघ्र, त्रिविध सम्प्रकीर्त्तितः**

**यत्रदानतपकर्म न त्याज्यं कार्यमेव तत्** [4]**।।**

जीवनयात्रायां शरीरभृतां प्रणिनां कर्म संपादनक्षेत्रे यज्ञ-दान-तप-कर्म पुरुषार्थ साधकाः आमन्यन्ते। तत्र दानं तु निःश्रेयस्सिद्धये आत्मविशुद्धये सर्वजनहिताय दानं तु परमसाधनं वरीवर्ती यत्विना जीवनं केवलं स्वार्थविजडितं विश्वभातृत्ववोधरहितं व्यर्थं मन्यते। तत्र महर्षिव्यासेन गीतायां सघोष्यते।-

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे**

**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्**[5]**।**

सात्त्विकदानस्य महत्त्वं व्याख्यातुं श्रीधरस्वामिना श्लोकस्यास्य व्याख्यानं कृतं यत् अनुपकारिणे नाम यस्मै यत् किमपि दीयते सः अनुपकारी भवतात्। श्रीधरस्वामि दृष्ट्या अनुपकारिणः शब्दस्यार्थः प्रत्युपकारासमर्थ इति। अर्थात् यस्मै अस्माभिः किमपि प्रदत्तं, सः मनुष्य अस्मभ्यं प्रत्युपकारनिमित्तं असमर्थः भूयात्। अत्र देशे नाम कुरुक्षेत्रादि स्थानविशेषे कालेनामग्रहणादौ समये नाम पात्रे च पात्रभूताय तपःश्रुतादिसम्पन्नाय दानं श्रेयस्करम् ।

## त्यागस्य भूमिका-

श्रीमद्भगवद्गीतायां त्यागस्य विषये द्वितीयाध्ययतृतीयश्लोके वर्ण्यते-

**क्लेव्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।**

**क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तपः**[6]**।।**

अर्थात् भगवान् श्रीकृष्णः रणाङ्गने उपस्थितमर्जुनम् प्रचोदयति। हे परन्तप अर्जुन त्वं क्लैब्यमपाकुरु। त्वया क्लैब्यं न स्पृहणीयम् । अतः त्वम् उद्वुद्धः सन् आत्मानं धर्मयुद्धे नियोजय।

**यथा कठोपनिषदि प्रोक्तम्-**

**'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत'।**

अत्रायं निष्कर्षः प्राज्ञ पुरुषानुपगम्य जाग्रतवुद्ध्या यथार्थज्ञानमुपाश्रय। विषादयोगे उच्यते भगवता वासुदेवेन-

**अशोच्यान्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।**

**गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः**[7]**।।**

अत्र एवमवगन्तव्यं यत् शरीरं विनश्वरं शरीरी अविनश्वरः । अतः अनयोः कृते शोचना मा कर्त्तव्या। स्वयमात्मा सत्सस्वरूपं परिवर्तनशीलशरीरं असतत्स्वरूपम् ।

**भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।**

**रात्र्यागमेऽवशःपार्थ प्रभवत्यहरागमे[8]।।**

**इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।**

**सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति[9] च ।।**

**न जायते म्रियते वा कदाचित्**

**नायं भूत्वा भविता वा न भूयः**

**अजो नित्यः शाश्वतोऽयं पुराणम्**

**न हन्यते हन्यमाने शरीरे[10]।।**

### त्यागस्वरूपम्-

ईशावास्योपनिषद्दिशा –

**ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्**

**तेन त्यक्तेन भूञ्जीथाः मा गृधः कस्यश्विद्धनम्[11]।।**

अनया वचनरीत्या त्यागपूर्वकभोगः एव महर्षिभिः अभिप्रेतः। तैत्तरीयोपनिषदि दानसम्बन्धे निगदितम्- श्रिया देयं भिया देयं ह्रिया देयम् एतावता त्यागस्य महिमा ऋर्षिभिः स्फुटिकृता । मनुस्मृतौ त्यागवैभवभूतं पञ्चयज्ञानां विवरणं दत्तम्। तद्यथा- देवयज्ञः, ऋषियज्ञः, पितृयज्ञः भूतयज्ञः नृयज्ञः तत्र यज्ञ इत्युक्ते अस्माकं सर्वं समर्पणं यत्कृतं यत्क्रियते यत् वा करिष्यते सर्वं तदा यज्ञमयं स्यात् चेत् प्रत्येकस्मिन् कर्मणि अस्माकं ईश्वरार्पितं चिन्तनं तिष्ठति । अन्यथा अहं करोमीति वृथाभिमानवशात् कर्मवन्धनस्य कारणं भविष्यति यदा सर्वं कर्मं निजेच्छया यदृच्छया वा न कृतम् । ईश्वरेच्छया विहितमिति ज्ञायते। तदेव कर्म यज्ञरूपं विधत्ते। श्री शङ्कराचार्येण उक्तम- कर्मणा वध्यते जन्तुः विद्यया च विमुच्यते।

सर्वनिखिलं कर्मवन्धनकारणं यदि तत् ईश्वरार्पितं मत्वा विधीयते तर्हि तादृशः वोध एव मोक्षप्रदः जायते। अतः त्याग इत्युक्ते न केवलं वस्तुत्यागः वुध्यते अपि तु हृदा मनसा धिया सूक्ष्मेक्षिकया प्रतिभया सर्वेषां भव्यभावनाऽपि पुण्य यज्ञमयः त्यागः वुध्यते। भगवद्गीतायां शान्तेः नैरन्तर्यं तदा लभ्यते यदा मनुष्यः त्यागोपेतं जीवनं निर्वहति। तथा हि उक्तं – त्यागात् शान्तिः निरन्तरम् ।

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

**तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः।**

**प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्।।** [12]

अत्र प्राचीनकाले ब्रह्मणः निर्देशत्रयमुपजीव्य ओम् तत्सत् इति संकेतितम्। एतैः त्रिभिः पुरा ब्राह्मणगणः, वेदसमूहः, यज्ञसमूहः निर्मिताः जाताः। तस्मात् ब्रह्मवादिपुरुषाणां ओमिति उच्चार्य शास्त्रविहितयज्ञदानतपस्यादि कर्माणि संपादयन्ति। सामान्यतः मनुष्य मात्रमधिकृत्योक्तम्।

तत्र ये सात्त्विकेषु अधिमध्ये ब्रह्मवादिन तेषान्तु ब्रह्मनिर्देश पूर्वक एव यज्ञादयः भवन्ति । इत्याह- ओम् तत् सत् इत्येवं ब्रह्मणः निर्देशो नाम्ना व्यपदेशः स्मृतशिष्टैः दर्शितः। तत्रैव गीतायां ज्ञानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः।

अत्र मुमुक्षुगणाः तत्शब्दमुच्चार्य कर्मफलकामनामकुर्वणा अपि यज्ञतपोदानादि कार्यं कुर्वन्तीति अर्थात् यत्र सर्वं कर्म ब्रह्मपरिचर्यायाः विषयत्वेन प्रतीयते। भगवता श्रीकृष्णेन सन्दर्भेऽस्मिन् कथितम्-

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्**

**असदित्युच्यते न च तत्प्रेत्य नो इह ।।**

अत्रायं निष्कर्षः यत् सत् कर्मासत्कर्मणोः असत् कर्म किमीति विविदिषायामुच्यते। तत्र हवनं यत्हुतं दानं यद्दत्तं तपः यत् तप्तं तत्सर्वं चेत् अश्रद्धया विधीयते तर्हि तत्सर्वं असत्कर्मेति। अत्र विश्वनाथ चक्रवर्ती निगदति। एतत्सर्वम् असत्कर्मत्वात् हुतमपि अहुतं, दत्तमपि अदत्तं, तपस्तप्तं अपि अतप्तं कृतमपि अकृतम् । तेन एतादृशं यज्ञदान तपः कर्माणि इह लोके परलोके न फलति।

## उपसंहारः-

**युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।**

**अयुक्तः कामकारेण फले सक्तो निबध्यते**[13]**।।**

युक्तः परमेश्वरैकनिष्ठः सन्कर्मणां फलं त्यक्त्वा कर्माणि करोति। आत्यन्तिकीं शान्तिं, मोक्षं प्राप्नोति। अयुक्तस्तु कामकारेण कामतः प्रवृत्त्या फले आसक्त नितरां वन्धनं प्राप्नोति।

भगवद्गीतायां त्यागमुररीकृत्य उदाहृतम्-

**काम्यानां कर्मणां न्यासो सन्यासं कवयो विदुः।**

**सर्वकर्मफलत्यागः प्राहुस्त्यागं विचक्षणाः**[14]**।।**

श्लोकेऽस्मिन् जीवने यानि काम्यकर्माणि सन्ति, तेषां न्यासः परित्यागो वा सन्यासिनां धर्मः। यथा कश्चित् संसारी पुत्रकामो यजेत ? वचनात् पुत्रप्राप्तिनिमित्तं पुत्रेष्टि यज्ञं करोति तथैव स्वर्गलिप्सया स्वर्गकामो यजेत वचनं पुरस्कृत्य

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

स्वर्गलाभनिमित्तं यज्ञकर्म संपादयति। एतादृश पुत्रेष्टियज्ञप्रभृतिकर्माणि सन्यासिना नैव क्रियन्ते । परन्तु संसारी ममनुष्यस्य कृते एतादृश कर्मत्यागः असम्भवः। सर्वेषां कर्मणां फलत्यागः निश्चेतव्येति।

श्रीधर स्वामीमते- " तथा च श्रुति एतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनायसेन इति अतः प्रतिपदोक्तं सर्वं फलं बन्धकत्वेन त्यक्त्वा विविदिषार्थं सर्वकर्मानुष्ठानं घटते इति। अस्य इदं तात्पर्यं वेदवचनमुपजीव्य विप्रा यज्ञदानतपप्रभृतिः कर्मभिः आत्मानं ज्ञातुं द्रष्टुं साक्षात्कर्तुं प्रभवति। तावता तत्कर्म सत्वशुद्धि पूर्णतया ज्ञानस्य अविरुद्धं जायते। यत्तु कर्माणि विधाय अपि नैष्कर्म्यसिद्धि लभ्यते। तथा हि भागवते उक्तं तावत्कर्माणि कुर्वित न निर्वेद्येत यावता-

**'मत्कथा श्रवणादौ वा श्रद्धा यावन्नजायते यावत्कालपर्यन्तं संसारे पराङ्मुखतया'** ।।

भगवन्परानुरक्ति निमित्त नैर्वेद्यं न जायते भगवत् कथा, गाथा, श्रवणानुरक्तिश्च न समुत्पद्यते। तावत्पर्यन्तं कर्माणि कर्त्तव्यानीति । अतः भगवद्गीतायां विविधेषु श्लोकेषु त्यागदानसम्बन्धे वहुनि श्रुतिवचनानि समुपन्यस्तानि सन्तीति।

**कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि**

**योगिनः कर्मकुर्वन्ति सङ्गंत्यक्त्वात्मशुद्धये**[15]।।

**पादटीकाः-**

1- गी. अ.18/5
2- मनुस्मृति -8/23
3- 18.2
4- 18.4
5- गी.अ-17.20
6- गी.अ.2.3
7- गी.उ 2.11
8- गी.अ.8/19
9- गी.अ.14/5
10. ई.उ.-1
11. गी.अ 17/24
12. गी.अ17.28
13. गी.अ.5.12
14. गी.अ.18.2
15. गी.अ. 5.11